# ।। अथ द्वितीयोऽध्यायः।।

## वेदान्तोपनिषत्पदार्थनिरूपणम्

सम्पूर्णे संस्कृतवाङ्मये वेद एव परमप्रमाणभूत इति नास्ति तिरोहितं विपश्चिदपश्चिमेभ्यः, सोऽयं वेदो द्वेधा विभज्यते - कर्मकाण्डात्मना ज्ञानकाण्डात्मना च, तत्र कर्मकाण्डम्, मन्त्रभागः, संहिताभागः इतीमे समे शब्दास्समानार्थकाः। ज्ञानकाण्डम्, ब्राह्मणभागः इति च समानार्थकौ शब्दौ, तत्र ब्राह्मणभाग मन्त्रभागयोः समानरूपेण वेदत्वमस्तीति प्राह महर्षिः कात्यायनः १ "मन्त्रब्राह्मणयोर्वेदनामधेयमिति" सूत्रेण द्वारा, बौधायनोऽपि महर्षिः प्राह - २ "मन्त्रब्राह्मणमित्याहुरिति" अत एव मन्त्रब्राह्मणाख्ययोरुभयोरेवभागयोः वेदत्वमव्याहतं भवति ।

३ मन्त्रभागो हि चतुर्वेदात्मना विभज्यते, ते च भेदाः सन्ति - ऋग्वेदः, यजुर्वेदः, सामवेदः, अर्थवेदश्च । ४ "तेषामृग्यत्रार्थवशेनपादव्यवस्था" अयमर्थो यत् यत्रार्थानुसारेण मन्त्राणां पादव्यवस्था क्रियते तत्र भवति "ऋक्" शब्दस्य प्रयोगः। सामवेदं लक्षयता महर्षिणा जैमिनिनाभिहितम् - "गीतिषु सामाख्या" इति वेदानां गीतिष्वेव सामशब्दस्य जायते प्रयोगः, यजुषां लक्षणं कुर्वता महर्षिणा प्रोक्तम् - ५"शेषे यजुश्शब्द" इति।

अयमर्थो यत् ऋक्सामव्यतिरिक्ते वेदभागे यजुश्शब्दस्यजायते प्रयोग इति, अथर्ववेदे तु तेषामेव मन्त्राणां संग्रहो विद्यते ये समुपलभ्यन्ते ऋग्यजुःसामवेदेषु । # वेदस्यापरो भागः ब्राह्मणभागो विद्यते, ब्राह्मणभागस्यैव भागविशेष उपनिषत्भागो # विद्यते, उपनिषदामेवापरं नाम वेदान्त इति, वेदस्य तस्याः तस्याश्शाखाया अन्तिमाध्यायरूपेण संगृहितत्वादपि उपनिषदां भवति वेदान्तशब्देनाभिधानम्, वेदार्थनिर्णयोपयोगित्वादपि वेदान्तशब्देनाभिधानं भवति उपनिषदाम् । अन्तशब्दो

---

१ कात्यायनपरिशिष्टम्

२ बौधायनगृह्यसूत्रम्

३ "तच्चोदकेषु मंत्राख्या" – पूर्वमीमांसा – २/१/३१

४ जैमिनिन्यायमाला – २/१/३५

५ जैमिनिन्यायमाला – २/१/३६

हि अवसान प्र: संशयापगमरूपनिर्णयपरश्चेति, यस्य न जायते वेन्दातेषु व्युत्पत्तिः तस्य मन्त्रभागस्याप्यर्थो दुर्ग्रह एव भवति, तानि तानि कर्माणि किन्देवतोद्देशेन प्रवृत्तानि सन्ति, किञ्चास्ति कर्मणां मुख्यं लक्ष्यमिति वेदान्ताध्ययनेनैव ज्ञातुं शक्यते। अत एव वेदान्ताः पूर्वभागस्यार्थवगमेऽपि भवन्त्युपकारकाः।

"सुसूक्ष्मं तत्वं सुबहुपरिश्रम्यैव गृहितं सत् स्थेम्ने कल्पते" इति धर्मादनन्तरं वेदेषूपनिषदां माध्यमेन कृतोऽस्ति तत्त्वोपदेशः, एतस्मादेव कारणादारूणिरुद्दालकः स्वीयात्मजं श्वेतकेतुम् १ "न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति" तीव्रेण वाक्येनोद्बोधनं कृत्वा प्रेषयित्वा च गुरूकुलं सर्वज्ञत्वमवाप्य समागते च तस्मिन् शिष्टाचारादिकमकृत्वैवस्थिते सत्यप्राक्षीत्" २ स्तब्धोऽस्युत तमादेशमप्राक्षीः येनाश्रुतं श्रुतं भवति, अमतं मतमविज्ञातं विज्ञातमिति" एक विज्ञानेन सर्वविज्ञानप्रतिज्ञाय जाते च तस्मिन् विनते, पृष्टे च ३ "कथं नु भगवः स आदेशो भवति" इति, ४ "तत्वमसीति" नवधाभ्यस्य ५ "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिभिः वाक्यैः अखिलहेयप्रत्यनीकमनवधिकातिशयासंख्येयकल्याणगुणगुणार्णवम्, जगतोऽभिन्ननिमित्तोपादानकारणं जगन्मूलं जगदाधारं जगदायतनादिगुणगणैरलंकृतं परमं तत्त्वमुपदिदेश।

एतत् सर्वं ज्ञानं रहस्यात्मकं विद्यते, अत एवैतेषांज्ञानानां प्रतिपादको वेदभाग उपनिषद् इत्यभिधीयते, उपनिषच्छष्दस्य हि मुख्ययावृत्त्या रहस्यार्थपरत्वात् ।

अथ कस्मादुपनिषदिति चेदत्र केचन प्राहुः, उप = गुरोस्समीपे निषद्य = उपविश्य यस्मात् शिष्येण गृहयत इति, परं चेदं सर्वस्य वेदस्य विद्यास्थानस्य चाविशिष्टमेव अत एव नैनद् भवितुमर्हति। असाधारणधर्मनिर्देशात्मकं लक्षणमुपनिषदाम्, किन्तु यदि परमरहस्यरूपा वेदान्त एवाचार्यस्य सविध उपविश्य शिष्यैः गृहयन्ते इति वक्तुर्भवेदाशयः तदात्वन्वेतुमर्हति तत् कथनम् ।

१ छान्दोग्योपनिषत् – ६/१/१
२ छान्दोग्योपनिषत् – ६/१/३
३ छान्दोग्योपनिषत् – ६/१/३
४ छान्दोग्योपनिषत् – ६/८/७
५ छान्दोग्योपनिषत् – ६/२/१

आचार्यः शंकरः कठोपनिषदः भाष्ये निम्नांकितेन प्रकारेण उपनिषत्पदार्थं विवृणोति, "षद्लृ विशरणगत्यवसादनेषु, विशरणार्थकोऽयं धातुः उपनिपूर्वः, निःशेषतापत्रयविशरणं ज्ञानं तत्सम्पादकतया वेदभागं च वक्ति" इति।

उत्तमूरवीरराघवाचार्यः केनोपनिषदो भाष्यस्य भूमिकायां निम्नाङ्कितेन प्रकारेण उपनिषदां व्युत्पत्यादि विषये प्राचीनानामाचार्याणां विचारमुपन्यस्यति - १ "ब्रह्मण्युपनिषण्णेत्युपनिषत्, उपनिषण्णत्वात् वा उपनिषत् इति हि वाक्यम् "गहने ह्यीदं विद्या सन्निविष्टा" इति तद्विषयं द्रमिडभाष्यम्, गहने = ब्रह्मण्युपनिषण्णेति भाष्यविषया वामनटीका, अद्वारकभगवद्प्रतिपादनत्वमुपनिषण्णत्वमिति ।

वाक्यं नाम छान्दोग्यव्याख्यानरूपो ब्रह्मानन्दिकृतो ग्रन्थः, अनेन विवेचनेन वेदान्त. शब्दो हि उपनिषत्सु हि प्रयुज्यते। तथा चाहाद्वैतवेदान्तसारस्यकर्ता सदानन्दाचार्यः - २ "वेदान्ता नाम उपनिषद् वाक्यं प्रमाणम्" अयमर्थो यत् यस्मिन् शास्त्रे उपनिषदां वाक्यान्येव प्रमाणंरूपेण स्वीक्रियन्ते तच्छास्त्रं वेदान्त इत्यभिधीयते । अत एव उपनिषदेववेदान्तशब्दवाच्याः भवन्ति, ताश्च सर्वा उपनिषदः मुख्यरूपेण ब्रह्मणः स्वरूपरूपगुणविभूत्यैश्वर्यादिकानामेव प्रतिपादनं कुर्वन्ति ।

## उपनिषदां कालः .

उपनिषदां विषये विचारकाणां द्विविधा मतिर्वतते, वेदान्तिनो वैदिकाश्च स्वीकुर्वन्ति यत् इमास्सर्वा उपनिषदः वेदस्यैव भागविशेषाः सन्ति, वेदाश्च सर्वेऽपौरुषेयास्सन्ति, कस्यचनापि ते रचनाः नहि सन्ति, श्वेताश्वतरोपनिषद्युक्तं हि ३ "तस्य निःश्वसितं वेदा" इति, अयमर्थो यत् परमात्मनः निःश्वासभूतास्सन्ति वेदाः, येन प्रकारेण वयं स्वकीयानां श्वासप्रश्वासादीनां निर्मातारो न हि भवामः तेनैव प्रकारेण परमात्मापि स्वश्वासभूतानां वेदानां निर्माता न भवति, अपि सृष्टेरादौ सः पूर्वकल्पेषु विद्यमानमेव वेदं स्मारं स्मारं तस्योपदेशं ब्रह्मणे करोति

---

१ उत्तमूरवीरराघवाचार्यः – केनाद्युपनिषत् भाष्य भूमिका पृष्ठ - ४

२ वेदान्तसार पृष्ठ – १

३ श्वेताश्वतरोपनिषत् तथा च – ना. पू. ता. – ५/११

तथान्या श्रुतिः [1]"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै, तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति श्रुतिः वेदानां नित्यत्वं प्रतिपादयति, ऋग्वेदीयोऽपि मन्त्रो वक्ति यत् [2] "यज्ञेन वाचः पदवीयमापयन्तामन्वविन्दन्तितिर्षुः प्रविष्टाम्" तथैव वेदानां नित्यत्वं प्रतिपादयन्ती व्यासस्मृतिर्ब्रूते –

**[3] युगान्तेन्तर्हितान् वेदान् सेतिहासान्महर्षयः ।**
**लेभिरे तपसा पूर्वमनुज्ञाताः स्वयं भुवा ॥**

शारीरकमीमांसायाः [4] "अत एव च नित्यत्वम्" [5] "समान नामरूपत्वावृतावप्यविरोधो दर्शनात् स्मृतेश्च" इत्यनयोः सूत्रयोः भगवान् बादरायणोऽपि वेदानां नित्यत्वमपौरुषेयत्वं च समर्थयति ।

इत्येतन्मतानुसारेण वेदानामुपनिषदां वा कालविचारस्य प्रश्न एव न ह्युद्येति, परञ्चार्वाचीनाः वेदानां कृतकत्वमेवापादयन्ति निर्धारयन्ति च स्वस्वमतानुसारेण तेषां कालम्, अत एव तेषामेव मतानुसारेणोपनिषदां कालविषये काचन चर्चा उपस्थाप्यते। तथाहि -

१ मैक्समूलरमहोदयः वेदानां कालम् १४०० ई. पू. मन्यते
२ विन्टर नित्ज महोदयः वेदानां कालम् ४५०० ई. पू. स्वीकरोति
३ तिलक महोदयः, जैकोबी महोदयः, अविनाशचन्द्रदास महोदयश्च वेदानां कालम् २५००० ई. पू. अभ्युपगच्छन्ति

इमे समे अर्वाचीनाः ऐतिह्यविदो वदन्ति यदुपनिषदां रचना वेदानां रचनायाः पञ्चशतवर्षाणामन्तरमभवदिति, परञ्चैतत्सर्वं पाश्चात्यविचारकाणां

---

१ श्वेताश्वतरोपनिषत् – ६/१८
२ ऋग्वेद संहिता – १०/५१/३
३ ब्रह्मसूत्र – १/३/३० सूत्रस्य शांकरभाष्ये उद्धृता स्मृतिः
४ शारीरकमीमांसा – ९/३/२८
५ शारीरकमीमांसा – ९/३/२९

भारतीयानामप्याधुनिकानां विचारकाणां कथनं वर्तते, यन्नहि संवदति भारतीयानामास्तिकानां दार्शनिकानां विचारेभ्यः ।

## उपनिषदां संख्या

वेदानां तासां तासां शाखानामन्तिमोऽध्याय उपनिषन्नाम्ना हि भवत्यभिहितम्, अत एव वेदानां यावत्यः शाखाः भवेयुः तावत्य एव भवेयुरुपनिषदः, तत्र वेदानां शाखानां विषये महर्षिः पतञ्जलिः पशपशाह्निके लिखति-

[१] "एकशतमध्वर्युशाखाः, सहस्त्रवर्त्मा सामवेदः, एकविंशतिधा वाहबृच्यं, नवधा अथर्वणो वेदः" अयमर्थो यत् यर्जुवेदस्य १०१ शाखाः सन्ति, सामवेदस्य १००० शाखाः सन्ति, ऋग्वेदस्य २१ शाखाः सन्ति, अथर्ववेदस्य च ९ शाखाः सन्ति, अखिलमाहृत्य वेदशाखानां संख्या ११३१ वर्तन्ते, अनेनानुसारेण उपनिषदामपि संख्या ११३१ एव भवेत् परञ्च कालस्य दैर्ध्यात्, संरक्षकाणां प्रमादात्, राजनीतिकानां विप्लवानां संभवात्, राजाश्रयस्याभावात्, वैदिकानां विदुषामुपनिषदां विषय औदासीन्याच्च अधिकतमा उपनिषदः विनष्टा एव सञ्जाता, अल्पीयस्यएव समुपलभ्यन्ते

## प्रकाशितानामुपनिषदां संख्या - नामानि च

बहोःकालात् प्राक् वाराणसितः "अष्टोत्तरशतोपनिषत्" नाम्ना प्रकाशनं सञ्जातमुपनिषदां संग्रहस्य, तत्र द्वादशोत्तरशतसंख्यकानामुपनिषदां संग्रहो विद्यते, १९७० खैष्टाब्दे मोतीलाल बनारसीदास संस्थानतः निम्नांकितानामुपनिषदां संग्रहः प्रकाशितोऽभूत्, तथा चोपनिषदां नामानि.

- ईशावास्योपनिषत्
- केनोपनिषत्
- कठोपनिषत्
- प्रश्नोपनिषत्
- मुण्डकोपषित्

१ व्याकरणमहाभाष्यम् – पृष्ठ सं. ७१ (मुम्बई प्रकाशनम्)

---

- माण्डूक्योपनिषत्
- तैत्तिरीयोपनिषत्
- ऐतरेयोपनिषत्
- छान्दोग्योपनिषत्
- बृहदारण्यकोपनिषत्
- श्वेताश्वतरोपनिषत्
- ब्रह्मबिन्दूपनिषत्
- कैवल्योपनिषत्
- जाबालोपनिषत्
- हंसोपनिषत्
- आरूणिकोपनिषत्
- गर्भोपनिषत्
- नारायणाथर्वशिरउपनिषत्
- महानारायणोपनिषत्
- परमहंसोपनिषत्
- ब्रह्मोपनिषत्
- अमृतनादोपनिषत्
- अथर्वशिरउपनिषत्
- अथर्वशिखोपनिषत्
- मैत्रायण्युपनिषत्
- कौषीतकिब्राह्मणोपनिषत्
- बृहज्जाबालोपनिषत्
- नृसिंहपूर्वतापनीयोपनिषत्
- नृसिंहोत्तरतापनीयोपनिषत्
- कालाग्निरूद्रोपनिषत्
- मैत्रेय्युपनिषत्

---

- सुबालोपनिषत्
- क्षुरिकोपनिषत्
- मन्त्रिकोपनिषत्
- सर्वसारोपनिषत्
- निरालम्बोपनिषत्
- शुकरहस्योपनिषत्
- वज्रसूचिकोपनिषत्
- तेजोबिन्दूपनिषत्
- नादबिन्दूपनिषत्
- ध्यानबिन्दूपनिषत्
- ब्रह्मविद्योपनिषत्
- योगतत्त्वोपनिषत्
- आत्मप्रबोधोपनिषत्
- नारदपरिव्राजकोपनिषत्
- त्रिशिखिब्राह्मणोपनिषत्
- सीतोपनिषत्
- योगचूडामण्युपनिषत्
- निर्वाणोपनिषत्
- मण्डलब्राह्मणोपनिषत्
- दक्षिणामूर्त्युपनिषत्
- शरभोपनिषत्
- स्कन्दोपनिषत्
- त्रिपाद्विभूतिमहानारायणोपनिषत्
- अद्वयतारकोपनिषत्
- रामरहस्योपनिषत्
- श्रीरामपूर्वतापिन्युपनिषत्

- श्रीरामोत्तरतापिन्युपनिषत्
- वासुदेवोपनिषत्
- मुद्गलोपनिषत्
- शाण्डिल्योपनिषत्
- पैङ्गलोपनिषत्
- भिक्षुकोपनिषत्
- महोपनिषत्
- शारीरकोपनिषत्
- योगशिखोपनिषत्
- तुरीयातीतोपनिषत्
- संन्यासोपनिषत्
- परमहंसपरिव्राजकोपनिषत्
- अक्षमालिकोपनिषत्
- अव्यक्तोपनिषत्
- एकाक्षरोपनिषत्
- अन्नपूर्णोपनिषत्
- सूर्योपनिषत्
- अक्ष्युपनिषत्
- अध्यात्मोपनिषत्
- कुण्डिकोपनिषत्
- सावित्र्युपनिषत्
- आत्मोपनिषत्
- पाशुपतब्रह्मोपनिषत्
- परब्रह्मोपनिषत्
- अवधूतोपनिषत्
- त्रिपुरातापिन्युपनिषत्

- देव्युपनिषत्
- त्रिपुरोपनिषत्
- कठरुद्रोपनिषत्
- भावनोपनिषत्
- रुद्रहृदयोपनिषत्
- योगकुण्डल्युपनिषत्
- भस्मजाबालोपनिषत्
- रुद्राक्षजाबालोपनिषत्
- गणपत्युपनिषत्
- जाबालदर्शनोपनिषत्
- तारसारोपनिषत्
- महावाक्योपनिषत्
- पञ्चब्रह्मोपनिषत्
- प्राणाग्निहोत्रोपनिषत्
- गोपालपूर्वतापिन्युपनिषत्
- गोपालोत्तरतापिन्युपनिषत्
- कृष्णोपनिषत्
- याज्ञवल्क्योपनिषत्
- वराहोपनिषत्
- शाट्यायनीयोपनिषत्
- हयग्रीवोपनिषत्
- दत्तात्रेयोपनिषत्
- गारुडोपनिषत्
- कलिसन्तरणोपनिषत्
- जाबाल्युपनिषत्
- गणेशपूर्वतापिन्युपनिषत्

- गणेशोत्तरतापिन्युपनिषत्
- संन्यासोपनिषत्
- गोपीचन्दनोपनिषत्
- सरस्वतीरहस्योपनिषत्
- पिण्डोपनिषत्
- महोपनिषत्
- बह्वृचोपनिषत्
- आश्रमोपनिषत्
- सौभाग्यलक्ष्म्युपनिषत्
- योगशिखोपनिषत्
- मुक्तिकोपनिषत्
- योगराजोपनिषत्
- अद्वैतोपनिषत्
- आचमनोपनिषत्
- आत्मपूजोपनिषत्
- आर्षेयोपनिषत्
- इतिहासोपनिषत्
- चतुर्वेदोपनिषत्
- चाक्षुषोपनिषत्
- छागलेयोपनिषत्
- तुरीयोपनिषत्
- द्वयोपनिषत्
- निरुक्तोपनिषत्
- पिण्डोपनिषत्
- प्रणवोपनिषत्
- बाष्कलमन्त्रोपनिषत्

---

- मठाम्नायोपनिषत्
- विश्रामोपनिषत्
- शौनकोपनिषत्
- सूर्यतापिन्युपनिषत्
- स्वसंवेद्योपनिषत्
- ऊर्ध्वपुण्ड्रोपनिषत्
- कात्यायनोपनिषत्
- गोपीचन्दनोपनिषत्
- तुलस्युपनिषत्
- नारदोपनिषत्
- नारायणपूर्वतापनीयोपनिषत्
- नारायणोत्तरतापनीयोपनिषत्
- नृसिंहषट्चक्रोपनिषत्
- पारमात्मिकोपनिषत्
- यज्ञोपवीतोपनिषत्
- राधोपनिषत्
- लाङ्गूलोपनिषत्
- श्रीकृष्णपुरुषोत्तमसिद्धान्तोपनिषत्
- सङ्कर्षणोपनिषत्
- सामरहस्योपनिषत्
- सुदर्शनोपनिषत्
- नीलरुद्रोपनिषत्
- पारायणोपनिषत्
- बिल्वोपनिषत्
- मृत्युलाङ्गूलोपनिषत्
- रुद्रोपनिषत्

- लिङ्गोपनिषत्
- वज्रपिञ्जरोपनिषत्
- वटुकोपनिषत्
- शिवसङ्कल्पोपनिषत्
- शिवोपनिषत्
- सदानन्दोपनिषत्
- सिद्धान्तशिखोपनिषत्
- सिद्धान्तसारोपनिषत्
- हेरम्बोपनिषत्
- अल्लोपनिषत्
- आथर्वणद्वितीयोपनिषत्
- कामराजकीलितोद्धारोपनिषत्
- कालिकोपनिषत्
- कालीमेघादीक्षितोपनिषत्
- गायत्रीरहस्योपनिषत्
- गायत्र्युपनिषत्
- गुह्यकाल्युपनिषत्
- गुह्यषोढान्यासोपनिषत्
- पीताम्बरोपनिषत्
- राजश्यामलारहस्योपनिषत्
- वनदुर्गोपनिषत्
- श्यामोपनिषत्
- श्रीचक्रोपनिषत्
- श्रीविद्यातारकोपनिषत्
- षोढोपनिषत्
- सुमुख्युपनिषत्

- हंसषोढोपनिषत्

चौखम्बा विद्याभवन वाराणसीतः प्रकाशिते "उपनिषत्वाक्यमहाकोषे" २३९ - एकोनचत्वारिंशोत्तरद्विशतसंख्यकानामुपनिषदां वाक्यानि सन्ति संगृहितानि, अत एवेदानीं यावत्प्रकाशितानापुनिषदां संख्या २३९ तः नास्ति न्यूनेति निश्चिप्रचम् ।

## प्रधाना उपनिषदः

यद्यपि इमाः सर्वा उपनिषदः तेभ्यस्तेभ्यस्संस्थानेभ्यः सन्ति प्रकाशिताः तथापि ते ते भाष्यकाराः येषामुनिषदां भाष्याण्यारचयामासुस्ते तु निम्नाङ्किताङ्गुलिगण्या एव सन्ति, अद्वैतदर्शनस्य भाष्यकारः आचार्यः शङ्करः निम्नाङ्कितानां त्रयोदशसंख्यकानां भाष्यमकार्षित्

**ईशावास्योपनिषत्**
**केनोपनिषत्**
**कठोपनिषत्**
**प्रश्नोपनिषत्**
**मुण्डकोपनिषत्**
**माण्डूक्योपनिषत्**
**ऐतरेयोपनिषत्**
**तैत्तिरीयोपनिषत्**
**छान्दोग्योपनिषत्**
**बृहदारण्यकोपनिषत्**
**श्वेताश्वतरोपनिषत्**
**कौषीतक्युपनिषत्**
**मैत्रायण्युपनिषत्**

एतासां सर्वासामुपनिषदामुदाहरणान्यपि श्रीमच्छङ्कराचार्यैः स्वभाष्यग्रन्थेषूपन्यस्तानि सन्ति, श्रीरामानुजाचार्यस्तु श्रीभाष्यादिकेषु स्वीयभाष्यग्रन्थेषु षट्त्रिंशत्संख्यकानामुपनिषदां वाक्यान्युद्धृतवान्, रामानुजमतानुयायि रङ्गरामानुजाचार्यः अग्निरहस्य - द्वयोपनिषत् - सुबालोपनिषत् - महानारायणोपनिषत् प्रभृतीनामपि उपनिषदां भाष्याणि चकार ।

बहवः समालोचकाः कथयन्ति यत् रामानुजाचार्यैः या या उपनिषद उद्धृताः तद्व्यतिरिक्ता उपनिषद अर्वाचीनाः सन्ति परञ्चेतेषामेतस्मिन्कथने किमपि प्रमाणं नास्ति, अत एवास्मिन् विषये कृतेन विचारेणालम् ।

## उपनिषदां वर्ण्यविषयाः

सर्वासामुपनिषदां प्रायो वर्ण्यविषयाः तत्त्वहितपुरुषार्था एव सन्ति । अत्र तत्त्वशब्देन चेतनाचेतनेश्वरा एवाभिधीयन्ते, वस्तुतः तत्त्वशब्देन पारमार्थिकाः विषया एवाभिधीयन्ते, तानि च तत्त्वानि त्रीण्येव सन्ति, चेतनाचेतनेश्वरा इति । अत एव तत्त्व शब्देन तत्त्वत्रयस्याभिधानं भवति तथा चोक्तं पिल्लैलोकाचार्येण तत्त्वत्रयनाम्नि ग्रन्थे [१] "तत्त्वत्रयं नाम चिदचिदीश्वरश्च" अयमाशयो यत् - जीवप्रकृतीश्वराणां समुद्रितं नाम तत्त्वत्रयम्, मोक्षावाप्तये एतेषां तत्वानां ज्ञानमावश्यकं भवति, इति प्रतिपादयता श्रीमल्लोकाचार्येणाभिहितम् [२]"मुमुक्षोश्चेतनस्य मोक्षसिद्धये तत्त्वत्रयज्ञानमावश्यकमिति"

तत्वत्रयमेव वैदिकानां सारतमः सैद्धान्तिकोऽर्थः, तत्त्वत्रयस्वैव प्रतिपादने सर्वेषामुपनिषद्वाक्यानां परमं तात्पर्यमिति वैदिका अभिप्रयन्ति, तत्र चित्, चेतनो, जीव, प्रत्यक्, आत्मा प्रभृतयः शब्दाः समानार्थकाः इति शब्दविदः। अचेतनम्, अचित्, प्रकृतिः, माया, प्रधानम्, अजा इत्यादिका अपि शब्दाः समानार्थकास्सन्ति, उपनिषत्सु परब्रह्म - परमात्मा - ईश्वर - महेश्वरेत्यादिकाः शब्दा परंब्रह्माभिदधन्ति ।

[३]"भोक्ता भोग्यं प्रेरितारञ्च मत्वा"
[४]"ज्ञाज्ञौ द्वावजावीशनीशौ"
[५]"क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः"

---

१ पिल्लै लोकाचार्यः – तत्वत्रये – चित्प्रकरणम् – पृष्ठम् – ५
२ पिल्लै लोकाचार्यः – तत्वत्रये – चित्प्रकरणम् – पृष्ठम् – १
३ श्वेताश्वतरोपनिषत् – १/१२
४ श्वेताश्वतरोपनिषत् – १/९
५ श्वेताश्वतरोपनिषत् – १/१०

---

[१]"प्रधान क्षेत्रज्ञपतिर्गुणेशः" इत्यादिकाः श्रुतयः
[२]"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्चते ॥"
[३]"उत्तमः पुरुषत्वन्यः परमात्मेत्युदाहृतः ।"
[४]"यस्मात् क्षरमतीतोऽहमक्षरादपिचोत्तमः ।
तस्माल्लोके च वेदे च प्रथितः पुरुषोत्तमः ॥" इत्यादिस्मृतिवाक्यानि
[५]"नेतरोऽनुपपत्तेः"
[६]"भेदव्यपदेशाच्च"
[७]"अनुपपत्तेस्तु न शारीरः"
[८]"कर्मकतृ व्यपदेशाच्च"
[९]"संभोगप्राप्तिरितिचेन्न"
[१०]"मुक्तोपसृप्य व्यपदेशाच्च"
[११]"सुषुप्त्युत्क्रान्त्योर्भेदेन"
[१२]"अधिकं तु मोदनिर्देशात्"

इत्यादीनि सूत्राणि च तत्त्वत्रयस्य स्वरूपयाथात्म्यं, तस्यपारस्परिकसम्बन्धम्, भेदांश्च प्रतिपादयन्ति। हितशब्देन आत्मोज्जीवनसाधनानि उच्यन्ते, तानि च सन्ति कर्मयोग - ज्ञानयोग - भक्तियोग - प्रपत्तियोगादीनि । पुरुषार्थ शब्देन च चत्वारः धमार्थकाममोक्षाख्याः उच्यन्ते, तत्रापि मोक्ष एव परमः पुरुषार्थ इति ।

उपनिषदः परंब्रह्मशब्देन, क्वचन ब्रह्मशब्देन, क्वचन ईश्वरशब्देन च परस्य ब्रह्मणो निरूपणं कुर्वन्ति।

---

१ श्वेताश्वतरोपनिषत् – ६/१६
२ श्रीमद्भगवद्गीता – १५-१६
३ श्रीमद्भगवद्गीता – १५-१७
४ श्रीमद्भगवद्गीता – १५-१८
५ शारीरकमीमांसा – १/१/१७
६ शारीरकमीमांसा – १/१/१८
७ शारीरकंमीमांसा – १/२/३
८ शारीरकमीमांसा – १/२/४
९ शारीरकमीमांसा – १/२/८
१० शारीरकमीमांसा – १/३/२
११ शारीरकमीमांसा – १/३/४३
१२ शारीरकमीमांसा – २/१/२२

१ "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिः ब्रह्मणः सत्यस्वरूपतां ज्ञानस्वरूपतां अनन्तस्वरूपतां च प्रतिपादयति २ "यः सर्वज्ञः सर्ववित्" इति श्रुतिर्वक्ति यत् - ईश्वरः सर्वाणि वस्तूनि यस्मात् सामान्यतो जानाति अत एव सर्वज्ञो वर्तते, यस्मात्त्वकारणात् सः सर्वाणि वस्तूनि विशेषतो जानाति अत एव सर्ववित् वर्तते." ३ "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" ४ "आनन्दं ब्रह्मणो विद्वान्" इति श्रुतिः ब्रह्मणो वाचामविषयत्वं प्रतिपादयति यतः तस्य कार्त्स्न्येन वर्णनं कर्तुं न शक्यते, तच्च ब्रह्म आनन्दमयं विद्यते इति वक्ति श्रुतिः, ५ "आनन्दमयोऽभ्यासात्" इति शारीरकसूत्रमपि ब्रह्मण आनन्दमयत्वं प्रतिपादयति ६ "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रत्यभिसंविशन्ति" इति तैत्तिरीयश्रुतिरभिधत्ते यत् यस्माज्जायत इदं जगत्, उत्पन्नं च सत् येन द्वारा स्थितं भवत् लीयते च यस्मिन् तद् ब्रह्म । ७ "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।" इति श्रुतिर्वक्ति यत् तस्य परस्य ब्रह्मणः विविधप्रकारवत्यः पराशक्तयः श्रूयन्ते, तस्य ज्ञानबलयोः क्रियाः स्वाभाविकरूपेण भवन्ति, परमात्मन एव वाचको वर्तते भगवच्छब्दः तस्यार्थं निरूपयन् महर्षिः पराशरोप्याह श्रीमति विष्णुपुराणे -

८ "शुद्धे महाविभूत्याख्यै, परे ब्रह्मणि शब्यते ।
मैत्रेय ! भगवच्छब्द, सर्वकारणकारणे ।।
सम्भर्तेति तथा भर्ता, गकारोऽर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा, गकारार्थस्तथा मुने ।।
एश्वर्यस्य समग्रस्य, वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैच, षण्णां भग इतीरणा ।।
वसन्ति तत्र भूतानि, भूतात्मन्यखिलात्मनि ।
स च भूतेष्वशेषेषु, वकारार्थस्ततोऽव्ययः ।।

---

१ तैत्तिरीयोपनिषत् – २/१/१
२ मुण्डकोपनिषत् – १/१/९
३ तैत्तिरीयोपनिषत् – २/४/५
४ तैत्तिरीयोपनिषत् – २/४/५
५ शारीरकमीमांसा – १/१/१३
६ तैत्तिरीयोपनिषत् – ३/१
७ श्वेताश्वतरोपनिषत् – ६/८
८ श्रीविष्णुपुराणम् – ६/५/७२-७५

एभिश्श्लोकैः परमात्मनः सर्वकारणकारणत्वं, सकलजगन्नेतृत्वं, सकल-जगत्भर्तृत्वं, स्रष्टृत्वमखिलैश्वर्यवीर्यतेजयशोज्ञानवैराग्याश्रयत्वं, सर्वस्य जगत अन्तरात्मत्वं च भवति प्रतिपादितः । [1] "एष आत्माऽपहतपाप्माविजरो वृमृत्युरविशोकोऽ-विजिधत्सोऽपिपासः सत्यकामः सत्य संकल्पः" इति श्रुतिः भगवंत मखिलहेयप्रत्यनीकमखिलकल्याणगुणाकरञ्च वक्ति । [2] "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुतिः परमात्मनः समाभ्यधिकरहितत्वं प्रतिपादयति" [3] "सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयम्" [4] "ब्रह्म वा इदमग्र आसीत्" [5] "आत्मा वा इदमेक एवाग्र आसीत्" [6] "एको ह वै नारायण आसीत्" इत्यादिकाः कारणवादिन्यः श्रुतयः तस्य परस्य ब्रह्मणो जगतोऽभिन्ननिमित्तोपादानतामद्वितीयतां नारायणशब्दवाच्यतां च प्रतिपादयन्ति ।" [7] "जन्माद्यस्य यतः" इति शारीरकसूत्रमपि ब्रह्मणो जगत्कारणत्वं प्रतिपादयति तथा भूतस्यास्य ब्रह्मणः [8] "जगत्सर्वं शरीरं ते" [9] "यस्यात्मा शरीरम्" [10] "यस्य पृथिविशरीरम्" इत्यादिकाः श्रुतयः जगच्छरीरत्वं प्रतिपादयन्ति। तदिदं सकल जगत् परस्य ब्रह्मणो व्याप्यभूतमिति" [11] "ईशावास्यमिदं सर्वमितिश्रुतिर्ब्रूते ।

## जीवस्वरूप निरूपणम्

तत्त्वत्रयस्य द्वितीयं तत्त्वं जीवो विद्यते स एव चेतन, चित्, प्रत्यक् आत्मा इत्यादिभिः शब्दैरुच्यते इति प्रागपि कथितम् । तस्यैतस्य जीवस्य निरूपणं श्रुतयः निम्नांकितेन प्रकारेण कुर्वन्ति तथा हि -

---

१ छान्दोग्योपनिषत् – ८/१/५
२ श्वेताश्वतरोपनिषत् – ६/८
३ छान्दोग्योपनिषत् – ६/२/१
४ बृहदारण्यकोपनिषत् – १/४/१
५ ऐतरेयोपनिषत् आत्मषट्क – १/१
६ महोपनिषत् – १/१
७ शारीरकमीमांसा – १/१/२
८ वाल्मीकीयरामायण – युद्धकाण्ड
९ बृहदारण्यकोपनिषत् – ३/७/२२
१० बृहदारण्यकोपनिषत् – ३/७/३
११ ईशवास्योपनिषत् – १

"हृदयान्तर्ज्योतिः पुरुषः" इति श्रुतिः आत्मनः हृत्प्रदेशस्थितिः स्वयंप्रकाशकत्वं च प्रतिपादयति, अनेनास्याजडत्वं भवत्यभिहितम् । अजडत्वं हि नाम - ज्ञानमन्तराऽपि स्वतोभासमानत्वम्, यस्मात् कारणादयमात्मा हृदयप्रदेशात्दुत्क्रामति गच्छति च तेषु तेषु लोकेषु, आयाति च पुनर्मर्त्यलोके तस्मादयमात्मा अणुपरिमाणकः, वक्ति च तथा शारीरकं सूत्रम् [1] "उत्कान्ति गत्या गतीनामिति" तथा चात्र श्रुतयो भवन्ति [2] "हृदि एष आत्मा" अयमात्मा हृत्प्रदेशे निवसतीत्यर्थः, "प्रद्योतेनैव आत्मा निष्क्रामति चक्षुषो वा, मुर्ध्नो वा, अत्येभ्यो वा शरीरेभ्यः" इति श्रुतिरात्मनो शरीरदेशादुत्क्रमणं [3] "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इति श्रुतिः शरीरादुत्क्रान्तानां जीवानां चन्द्रादिलोकेषुगमनम् "तस्माल्लोकात् पुनरेत्यस्मैलोकाय कर्मणे" इति श्रुतिः चन्द्रादिलोकेभ्यः मर्त्यलोकागमनं च प्रतिपादयति [4] "एषोऽणुरात्मा चेतसा वेदितव्यः" [5] "बालाग्रशतभागस्य, शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ इति च श्रुतिः जीवस्याणुपरिमाणत्वं प्रतिपादयति. न चात्र अणुपरिमाणक आत्मा चेत् - हृदयप्रदेशे तिष्ठति तर्हि शिरसि मे वेदना पादयोः सुखमिति कथमनुभवतीति वाच्यम्, मणिद्युमणिदीपादीनां कवचिदवस्थानेऽपि प्रभायाः सर्वत्रैकरूपेण व्याप्तिवज्ज्ञानस्य सर्वत्रैकरूपेण व्याप्त्या तदनुभवो न विरुध्यते तथा चोक्तं भगवता बादरायणेन शारीरक मीमांसायाम् [6] "गुणाद् वालोकवदिति"। भगवद्गीतायां भगवान् श्रीकृष्णोजीवस्याच्छेद्यत्वमदाह्यत्वमक्लेद्यत्वमशोष्यत्वं नित्यत्वं च निम्नांकितैः श्लोकैः[7] "नैन छिन्दन्ति शस्त्राणि, नैनं दहति पावकः । न चैनं क्लेकयन्त्यापो, न शोषयति मारुतः ॥ अच्छेद्योऽमदाह्योऽयमक्लेद्योऽ शोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ ज्ञानस्वरूपोऽयमात्मा ज्ञानवान् भवतीति "यो वेदेदं जिघ्राणीती स आत्मा" इत्यादिकाः श्रुतयः आत्मनो ज्ञातृत्वं प्रतिपादयन्ति

---

१ शारीरकमीमांसा २/३/२०
२ प्रश्नोपनिषत् ३/६
३ बृहदारण्यकोपनिषत् ६/८/२१
४ मुण्डकोपनिषत् ३/१/९
५ श्वेताश्वतरोपनिषत् ५/९
६ शारीरकमीमांसा २/३/२६
७ श्रीमद्भागवद्गीता २/२३-२४

किञ्च यद्यात्मा ज्ञानाश्रयो नो भवेत् तदा "ज्ञानमहमिति" अनुभवेत् न तु जानाम्यहमिति, ज्ञातृत्वादेवास्य कर्तत्वं भोक्तृत्वं च भवति, श्रुतिरपि आत्मनो भोक्तृत्वमभिधत्ते "[१] भोक्ता भोग्यं प्रेरितारं च मत्वा" इति वाक्ये, शारीरक मीमांसायामपि जीवस्य कर्तृत्वमभिहितम् [२] "कर्ताशास्त्रार्थवत्वात्" इति सूत्रेण। [३] "विज्ञानं यज्ञं तनुते" इति श्रुतिः आत्मनो ज्ञानमयं स्वरूपं वक्ति [४] "य आत्मानमन्तरो यमयति यमात्मा न वेद यस्यत्मा शरीरम्" इति श्रुतिरभिधत्ते यत् आत्मायं परमात्मको विद्यते ।

## जीवानां भेदः

जीवानां सामान्यतो भेदत्रयं भवति बद्धजीवा मुक्तजीवा नित्यजीवाश्च, तत्र बन्धसमायुक्ता जीवा बद्धा इतीरिता, उच्छीन्नसंसाराजीवाः मुक्तशब्दवाच्याः भवन्ति, कदाप्यनाघ्रातसंसाराः जीवाः नित्यजीवाः सन्ति [५] "समाने वृक्षे पुरुषो निमग्न अनीशया शोचति मुह्यमानः" [६] "तयोरन्यः पिप्पलं स्वादवत्ति" इति श्रुती च प्रतिपादयतः जीवानां कर्मफलभोक्तृत्वम्, कर्मफल भोक्तार एव जीवा बद्धा इत्यभिधीयन्ते, वयं समे संसारिणः बद्धकोटावैव स्मः आब्रह्म स्तम्बपर्यन्ताः समे जीवाः बद्धा एव एतेषां बद्धजीवानां देवतिर्यङ्मनुष्यस्थावरभेदेन, जरायुजाण्डजस्वेदजोद्भिजभेदेन वा चत्वारो भेदाः सम्पद्यन्ते, प्रकृतिसंसर्ग प्रध्वंसाभाववन्तो जीवाः मुक्ताः इत्युच्यन्ते, अयमाशयो यत् [७] "परिक्ष्यलोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेनः" इति श्रुतिर्वक्ति यत् वेदतो ब्राह्मणः कर्मजन्यस्य फलस्य परीक्षां कृत्वा ज्ञावा च तस्य नश्वरतां निश्चिनोति मनसि यत् कृतेन कर्मणा नित्यस्य मोक्षाख्यस्य पुरुषार्थस्य प्राप्तिर्न हि भवितुमर्हति अत एव संसारान्निर्विण्णो भवति, तदनन्तरं सो वेदविदाचार्यस्य सविधे गत्वा श्रवणादि द्वारा-

---

१ श्वेताश्वतरोपनिषत् १/१२
२ शारीरकममिांसा २/३/३३
३ तैत्तिरीयोपनिषत् आनन्दवल्लि ५
४ शतपथ ब्राह्मणम् १४/५/३०
५ मुण्डकोपनिषत् ३/१/२
६ मुण्डकोपनिषत् ३/१/१
७ मुण्डकोपनिषत् १/२/१२

[1] "प्रायस्य ब्रह्मणो रुपं, प्राप्तुश्च प्रत्यगात्मनः ।
प्राप्त्युपाय फलं प्राप्ते स्तथा प्राप्तिविरोधि च ॥

वदन्ति सकला वेदाः, सेतिहासपुराणकाः ।
मुनयश्च महात्मानो, वेदवेदान्तवेदिनः ॥

इति पञ्चरात्रागम सूक्त्यनुसारेण मीमांसोक्तन्यायानामालोकेऽर्थपञ्चकविज्ञानं लभते, तत्र आत्मपरमात्मनोः स्वरूपयाथात्म्यं ज्ञात्वा भगवत्प्राप्तिरूपस्य मोक्षस्यावाप्तये, तैलधारावदविच्छिन्नस्मृतिसन्तानरूपां सांगां भक्तिम् -

[2] "आनुकूल्यस्य संकल्पः, प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासो, गोपृत्ववरणं तथा ॥

आत्मनिःक्षेपकारुण्यं, षड्विद्या शरणागतिः ॥

इत्युक्त्यनुसारेण प्रपत्तिमङ्गीकृत्य एतच्छरीरावसाने, प्रारब्ध कर्मजन्यशरीरा-साने वा सुषुम्णा नाड्या शरीरादस्मान्निःसृत्य-

[3] "मुक्तोचिर्दिनपूर्वपक्षषड्डुदङ् मासाब्दवातांशुमद्,
ग्लोर्विद्युत्वरुणेन्द्रधातृमहितः सीमान्तसिन्ध्वाप्लुतः ।
श्रीवैकुण्ठमुपेत्य नित्यमजडं, तस्मिन्परब्रह्मणः
सायुज्यं समवाप्य नन्दति चिरं तेनैष धन्यःपुमान् ॥

इति सूक्त्यनुसारेण तैस्तैरतिवाहिकैः तेषु तेषु लोकेषु नीतः सन् तत्र तत्र सम्पूजितः सीमान्तसिन्धुं तीर्त्वा श्रीवैकुण्ठलोकमुपेत्य परमात्मानं साक्षात्कृत्य आविर्भूतगुणाष्टकः भगवच्चरणपरिचरणैकभोगो भवति मुक्तो जीवः। प्रकृति संसर्गात्यन्ताभाववन्तो जीवा नित्या इत्याभिधीयन्ते ते च सन्ति शेषशेषासनादिकाः तथा चात्र श्रुतिः "तद्विष्णोः परमं वदं सदा पश्यन्ति सूरयः" [4] "यत्र पूर्वे साध्याः सन्ति देवाः" "श्रीश्च लक्ष्मीश्च पत्न्यौ" इमाः सर्वाः श्रुतयः नित्यानां जीवानां वर्णनं कुर्वन्ति, नित्या हि जीवाः कदापि संसारे

१ पञ्चरात्रागम ईश्वरसंहिता
२ पञ्चरात्रागम ईश्वरसंहिता
३ वात्स्यवरदाचार्या सत्संग पद्यम् २
४ पुरुषसूक्तम् १६

नायान्ति, कदाचिद्भगवदिच्छा विशेषमनुभूय संसारेऽऽयान्ति तदा स्वागमनप्रयोजनं पूरयित्वा पुनः परमात्मन एव लोकं यान्ति ।

## मायानिरूपणम्

भगवतः शक्तिविशेषरूपिणी, जीवानां समक्षतः परमात्मस्वरूपतिरोधानकर्त्री माया स्वभावतो ज्ञानशून्या विकारास्पदा च भवति । इयमेव प्रधान - प्रकृति - अचित् - अविद्यादिशब्देनाभिधीयते, ह्यनीशा इयमेव जीवान् मोहयति, श्रुतिरिमां भोग्यशब्देनाभिधत्ते [१] "भोक्ताभोग्य प्रेरितारञ्च मत्वा" यस्मात् कारणादियं विकारास्पदा भवति तस्मात् क्षरमित्यभिधीयते , तथा च श्रुतिः [२] "क्षरंप्रधान ममृताक्षरं हरः" इति, इयं शुद्धसत्वम् - त्रिपाद्विभूतिरित्यादिकैः शब्दैरभिधीयते, यथा प्रतिपादितं पुरुषसूक्ते [३] "त्रिपादस्यामृतं दिवि" कठोपनिषदः श्रुति र्वक्ति" [४] "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः"।

अचितो द्वितीयो भेदः मिश्रसत्वं वर्तते, इदं हि सत्वरज स्तमोरूपगुणत्रययुक्तः बद्धचेतनानां ज्ञानानन्दयोस्तिरोधायकम्, विपरीतज्ञानजनकम्, नित्यम्, ईश्वरस्य क्रीडापरिकरभूतं, प्रदेशभेदेनकालेभेदेन च सदृशानां विसदृशानां विकारणां जनकं प्रकृति मायाविद्या शब्दैरभिधीयते, तदिदमचिद् विशेष एव । [५] "अनीशया शोचति मुह्यमानः इति श्रुतौ तत् अनीशा शब्देनोच्यते परमात्मनो नियाम्य भूतत्वात्तस्याः, [६] "अजामेकांम्" इति श्रुतौ सा अजेत्यभिधीयते, [७] "गौरनाद्यन्तवती जनित्रीभूतभाविनी" इति श्रुतौ सा प्रसवित्री अभिधीयते।

सेयं माया विकाराणां जनकत्वात् प्रकृतिरित्यभिधीयते, ज्ञान विरोधीत्वादविद्येति निगद्यते, विचित्रसृष्टिकरत्वान्मायेति प्रोच्यते । प्रलयकाले या

---

१ श्वेताखतरोपनिषत् १/१२
२ श्वेताखतरोपनिषत् १/१०
३ पुरुषसूक्तम् ३
४ कठोपनिषत् ५/१५
५ मुण्डकोपनिषत् ३/१/२
६ श्वेताश्तरोपनिषत् ४/५
७ मंत्रिकोपनिषत् ४

सत्वरजस्तमसां साम्यावस्था भवति सैवावस्था प्रकृतिरित्यभिधीयते, तस्याः प्रकृतेः विषमो यो हि विकारस्तः प्रथमो भवति महान्, तस्मादहंकारो जायते सात्विकराजसतामसभेदात् तत्र सात्विकस्थावरं नाम वैकारिकः, राजसाहंकारस्यापरं नाम तैजसः तामसाहंकारस्य चापरं नाम भूताद्यहंकारः, वैकारिकाहंकारादेकादशेन्द्रियाणि जायन्ते, तामसाहंकारत् पंचतन्मात्रां पञ्चमहाभूतानां च भवत्युत्पत्तिः । भूतानां सूक्ष्मावस्थैव तन्मात्र शब्देनाभिधीयते, राजसाहंकारस्तु सात्विक तामसाहंकारयोः स्वस्वकार्यो सहायको भवतिः इत्यं प्रकृतिर्भवति चतुर्विंशति तत्वात्मिका आचितः तृतीयो भेदः कालो भवति, स च जगति नित्यः श्रीवैकुण्ठेतु परमात्मनः क्रीडापरिकर भूतो भवति

उपनिषदां द्वितीयो वर्ण्योविषयोऽस्ति हिततत्वम्, हितशब्देनसाधनान्युच्यन्ते, परमात्मप्राप्तेः कानि साधनानि सन्ति इति हितविचारणावसरे विचार्यते, शास्त्रानुसारेण तु कर्मयोगः ज्ञानयोगः भक्तियोगः इत्येतानि हितरूपेण सन्ति निरूपिता उपनिषत्सु ।

## कर्मयोग निरूपणम्

"अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत्" इति नियमासुरेण यज्ञोपवीतसंस्कारानन्तरं-

**[१] श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि ।**
**युक्तश्छन्दांस्यधीयीत, मासान् विप्रोऽर्धपञ्चमान् ।।**

इति स्मृत्यनुसारेण गुरुकुलं गत्वा वेदाध्ययनं सम्पाद्य पुनः आचार्यमुखाद् जीवपरमात्मनोः यथार्थं ज्ञानं सम्पाद्य शक्त्यनुसारेण फलाभिसन्धिरहितानिषिद्धकाम्यनित्यनैमित्तकरूपपरिगृहितकर्मविशेष एव कर्मयोग इत्यभिधीयते । स च देवार्चनतपस्तीर्थयात्रादानयज्ञादिभेदभिन्नः। अयं कर्मयोगः जीवगतकल्मषापनयनद्वाराज्ञानयोगमुत्पाद्य तद्द्वारा भक्तेरुत्पादको भवति ।

---

१ मनुस्मृति ४/९५

## ज्ञानयोग निरूपणम्

कर्मयोगान्निर्मलान्तःकरणस्येश्वरशेषत्वेन प्रकृतिविमुक्तस्वात्मचिन्तन-विशेष एव ज्ञानयोग इत्यभिधीयते, तस्यैतस्य ज्ञानयोगस्य भक्तौ भवति साक्षादुपयोगः।

## भक्तियोगनिरूपणम्

भक्यियोगो नाम यमनियमासानप्राणायामप्रत्याहारध्यानधारणा समाधिरूपाष्टांगयुक्तस्तैलधारावदवच्छिन्नस्मृतिसन्तानरूपः, स च विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षरूपसाधनसम्पृक्तजन्यः, एवं साधनसम्पृक्तानुगृहीता भक्तिर्दर्शनसमानाकारा अन्तिमप्रत्ययावधिका च भवति । स चान्तिमप्रत्ययः एतच्छरीरावसाने शरीरान्तरावसाने वा भवति, वेदनध्यानोपासनादिशब्दवाच्या भक्तिः परभक्तिपरज्ञानपरमभक्तिरूपा क्रमवती प्रपत्यंगिका च जायते। उपनिषदः भक्तेः भेदभूतानां मोक्षविद्यानामपि वर्णनं कुर्वन्ति द्वात्रिंशत्संख्यकानाम् ताश्च निम्नांकिताः सन्ति ।

## मोक्षविद्यानां निरुपणम्

**सद्विद्या** – इयं विद्या छान्दोग्योपनिषदि [१] "सदेवसौम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिकाभिश्श्रुतिभिः समुपवर्णिता वर्तते, इयं विद्या परस्य ब्रह्मणो जगतोऽभिन्ननिमित्तोपादानकारणत्वेनोपासनमुपदिशति।

**आनन्दविद्या** - तैत्तिरीयोपनिषदः आनन्दवल्ल्यां समुपवर्णितेयं विद्या [२] "एतस्माद् वा एतस्मादानंदमयादन्योन्तर आत्मानन्दमयः" इत्यादि श्रुतिभिः, इयं विद्या आनन्दमयत्वेन ब्रह्मणोपासनं विधत्ते।

**अन्तरादित्यविद्या** - इयं विद्या छान्दोग्योपनिषदि समुपवर्णिता [३] "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात्

---

१ छान्दोग्योपनिषत् ६/२/१
२ तैत्तिरीयोपनिषत् , आनन्दवल्ली ५ अनुवाक
३ छान्दोग्योपनिषत् १/६/६-७

सर्व एव सुवर्णः तस्य यथाकप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्व पाप्मभ्य उदितः" इति श्रुत्या, अस्यां विद्यायां ब्रह्मणोऽतिमनोज्ञम् समुपवर्णितमुपास्यत्वेन ।

**आकाशविद्या** - छान्दोग्योपनिषदि [1] "अस्य लोकस्य का गतिरिति आकाश इति होवाच, सर्वाणि ह वा इमानि भूतानि आकाशादेवसमुत्पद्यन्ते, आकाशं प्रत्यस्तं यान्ति, आकाशो ह्येवैभ्यो ज्यायानाकाश एव परायणम्," इति श्रुत्या विद्येयं समुपविर्णिता, अस्यां विद्यायां परस्य ब्रह्मण आकाशशरीरत्वकेन परं प्रकाशत्वेन चोपासनं विहितम् ।

**प्राणविद्या** - छान्दोग्योपनिषदि [2] "सर्वाणि ह. वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इति श्रुत्या समुपवर्णिता प्रतिपादयति यत् प्राणशरीरकत्वेन ब्रह्मण उपासना विधेयेति ।

**गायत्रीज्योतिर्विद्या** - [3] "अथ यदतः परो दिवो ज्योतिः दीप्यते विश्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषु इदं वाव तद् यदिदम स्मिनन्तः पुरुषो ज्योतिः" इति श्रुत्या समुपवर्णिता इयं विद्या प्रतिपादयति यत् गायत्र्या अपि अधिष्ठाता परं ब्रह्मैव विद्यते ।

**इन्द्रप्राण विद्या** - [4] "प्रतर्दनो ह वै दैवोदासिः इन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च", इत्यादिकया श्रुत्या सुमपकान्तेयं विद्या वक्ति यत् परमात्मन एव इन्द्रादिकानां चेतनाचेतनानामात्मत्वेनोपासनीयत्वमिति ।

**शाण्डिल्यविद्या** - छान्दोग्योपनिषत् [5] "सर्वंखल्विदं ब्रह्म तज्जलानिति शान्त उपासीत, अथ खलु क्रतुमयोऽयं पुरुषो यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति, स क्रतुं कुर्वीत मनोमयः प्राणशरीर" इत्यादिकया श्रुत्यास्ति समुपवर्णितेयं विद्या, इयं विद्या बृहदारण्यके, अग्निरहस्येऽपि समुपर्णिता । इयं

---

१ छान्दोग्योपनिषत् १/९/१
२ छान्दोग्योपनिषत् १/११/५
३ छान्दोग्योपनिषत् ३/१३/७
४ कोषीतक्युपनिषत् ३/१
५ छान्दोग्योपनिषत् ३/१४/१-२

विद्योपदिशति यत् उपासनामयोऽयं जीवः अस्मिन् लोके यादृशप्रकारविशिष्टं ब्रह्मोपासते प्रेत्य सः तादृशप्रकारविशिष्टमेव ब्रह्म लभते अनुभवति च ।

**नाचिकेतसविद्या** - अस्याः विद्यायाः अपरं नाम अतृविद्याऽपि वर्तते, कठोपनिषदः [1]"यस्य ब्रह्म च क्षेत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यम सः" इति श्रुतिर्वक्ति यत् जगतोऽस्य लयो भवति परस्मिन्नेव ब्रह्मणि ।

**उपकोसलविद्या** - छान्दोग्योपनिषदः [2] "य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमेतदभयमेतद् ब्रह्म" इत्यादिकया श्रुत्या समुपवर्णितेयं विद्या प्रतिपादयति यत् संयद्वामत्वादि गुणकं ब्रह्मैव, अत एव तस्यैव सकलगुणगणाकररूपेणोपसना कर्तव्या ।

**अन्तर्यामिविद्या** - बृहदारण्यकोपनिषदः [3] "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम् यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्यामि अमृतः" इत्यादि श्रुत्या वर्णितेयं विद्या वर्णयति यत् सकलस्यान्तर्यामि परं ब्रह्मैव विद्यते अत एव तस्यैव चेतनाचेतनात्मकस्य जगतोऽन्तर्यामीरूपेणोपसना विधेया ।

**अक्षरपरविद्या** - [4] "अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यग्राहयमगोत्रमब्राह्मणमचक्षुः श्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः" इत्यादिकया श्रुत्या समुपवर्णितेयं ब्रह्मविद्या परस्यैव ब्रह्मणः परत्वमक्षरत्वञ्च विधाय तस्योपासनां करणीयत्वेनोपदिशति ।

**वैश्वानरविद्या** - [5]"वैश्वानरः साधारण शब्द विशेषात्" इति शारीरकसूत्रे वर्णितं यत् [6] "आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि" इति श्रुत्योपवर्णितवैश्वानरविद्या प्रतिपादयति यत् वैश्वानर शरीरकत्वेनोपास्यमस्ति हि ब्रह्म ।

---

१ कठोपनिषत् २/२५
२ छान्दोग्योपनिषत् ४/१५/१
३ बृहदारण्यकोपनिषत् ५/७
४ मुण्डकोपनिषत् २/१/१
५ शारीरकमीमांसा १/२/२५
६ छान्दोग्योपनिषत् ५/११

**भूमविद्या** - [१]"भूमासम्प्रसादादध्युपदेशात्" इति शारीरकसूत्रेण विवेचिता" [२]"यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" इति श्रुत्या समुपवर्णितेयं विद्या परस्यैव ब्रह्मणो वैपुल्यमापादयति ।

**गार्ग्यक्षरविद्या** - [३]"अक्षरमम्बरान्तधृतेः" इति सूत्रेण समालोचिता [४]"एतद्वैतदक्षरं गार्गि" इति श्रुत्योपवर्णितेयं विद्या प्रतिपादयति यदम्बरस्यापि (आकाशस्यापि) कारणं ब्रह्मैवेति ।

**प्रणवोपास्यपरमपुरुषविद्या** - प्रश्नोपनिषदि विद्येयं समुपवर्णिता अत्र श्रुतिः वर्णयति यत् मुक्तानामपि जीवानां भोग्यमस्तीश्वरः ।

**दहरविद्या** - [५] "दहर उत्तरेभ्यः" इति सूत्रेण विवेचितायामस्यां विद्यायां वर्णितमस्ति यदपहतपाप्मत्वादिविशिष्टं परं ब्रह्मैवास्ति ।

**अंगुष्ठप्रमितविद्या** - [६]"शब्दादेव प्रमितः" इति शारीरकसूत्रेण महर्षिर्बादरायणः प्रत्यपीपद यत् कठोपनिषदः "अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति" इति श्रुत्योपवर्णितेयं विद्या परस्य ब्रह्मणः सम्पूर्णजगन्नियामकत्वं वक्ति ।

**देवोपास्यज्योतिर्विद्या** - देवताधिकरणस्य [७]"तदुपर्यपि बादरायणः सम्भवात्" इति सूत्रेण वर्णितं यद् देवानामपि ब्रह्मोपासनायामधिकारो वर्तते ।

---

१ शारीरकमीमांसा १/२/७
२ छान्दोग्योपनिषत् ७/२४
३शारीरकमीमांसा १/३/९

४ बृहदारण्यकोपनिषत् ५/८
५शारीरकमीमांसा १/३/१४

६ शारीरकमीमांसा १/३/२३
७ शारीरकमीमांसा १/३/२५

**मधुविद्या** - अस्यां विद्यायां प्रतिपादितमस्ति यत् वसु रुद्र - आदित्य - मरुदादिकानां ब्रह्मैवात्मैति, महर्षि बादरायणोऽपि [१] "मध्यादिष्वसम्भवादनधिकारं जैमिनिः" इति सूत्रेण समर्थयामास।

**संवर्गविद्या** - विद्यामिमां भगवान् बादरायणः शारीरक मीमांसायाः [२] "शुगस्य तदानादर श्रवणतात् तदाद्रवणात् सूच्यते" इत्यादिके सूत्रे मीमांसितवान्, प्रतिपादयामास च छान्दोग्योपनिषदः इयं विद्या भगवान्सर्वेषामधिकारानुसारेण भवति उपास्य इति ।

**अजाशरीरकविद्या** - छान्दोग्योपनिषदि वर्णितायां अस्याः विद्याया अभिप्रायोऽस्ति यत् भगवान् एष प्रवृत्तेर्नियन्ता वर्तत इति, इयं विद्या ज्योतिषां ज्योतिर्विद्येत्यभिधीयते, विद्यामिमं व्याचकार भगवान् बादरायणः" [३] "न संख्योपसंग्रहादपि नाना भावादतिरेकाच्च" इत्यस्मिन् सूत्रे।

**बालाकिविद्या** - विद्येयं कौषीतकि ब्राह्मणे बृहदारण्यकोपनिषदि च वर्णिता वर्तते, अस्याः विद्यायाः वर्णनं भगवान् बादरायणः शारीरकमीमांसायाः [४] "जगद्वाचित्वात्" इत्यादिकेषु त्रिषु सूत्रेषु चकार, अस्यां विद्यायां जगतोऽभिन्ननिमित्तोपादानकरणस्य परस्य ब्रहमणोपास्यत्वमस्तीति वर्णितम् ।

**मैत्रेयिविद्या** - अस्यां महर्षिः याज्ञवल्क्यः प्रतिपादितवान् यत् परमात्मसाक्षात्कार एव मोक्षस्यसाधनमस्ति, बृहदारण्यकोपनिषद अस्यां विद्याया विवेचनं महर्षिर्बादरायणः शारीरकमीमांसायाः [५] "वाक्यान्वयात्" इत्यादिकेषु चतुर्षु सूत्रेषु चकार ।

**द्रुहिणरुद्रादिशारीरकविद्या** - [६] "एतेन सर्वे व्याख्याता व्याख्याता" इत्यस्मिन् शारीरके सूत्रे महर्षिर्बादरायणः इमां विद्यां व्याचकार, अस्यां विद्यायां भगवतः देवानामप्युपास्यत्वं प्रतिपादितमस्ति।

---

१ शारीरकमीमांसा १/३/३०
२ शारीरकमीमांसा १/१/३३
३ शारीरकमीमांसा १/४/११
४ शारीरकमीमांसा १/४/१६
५ शारीरकमीमांसा १/४/१९
६ शारीरकमीमांसा १/४/२९

---

**पञ्चाग्निविद्या** - छान्दोग्य-बृहदारण्यकोपनिषदोः वर्णितेयं विद्या प्रतिपादयतः यत् प्रसन्नो भगवान् एव संसारबन्धनाद्विमोचयति [1] "तदन्तर प्रतिपत्तौ रंहति सम्परिष्वक्तः" इत्यादिकेषु सप्तसु शारीरकसूत्रेषु व्याचकार भगवान् बादरायणः ।

**आदित्यस्थाहर्नामकविद्या** - इयं बृहदारण्यकोपनिषदो विद्यते, भगवान् नारायण एव आदित्यमण्डलस्थान्तर्यामि विद्यते इत्येवास्ति विद्याया अस्याः प्रतिपाद्यो विषयः, विद्यामिमां [2] "सम्बन्धादेवमन्यत्रापि" इत्यादिकेषु सूत्रेषु विचारयमास भगवान् बादरायणः ।

**अक्षिस्थाहन्नामकविद्या** - इयं विद्या बृहदारण्यकोपनिषदो विद्यते, अत्र भगवतः पुण्डरीकाक्षत्वमस्ति प्रतिपादितम् ।

**पुरुषविद्या** - बृहदारण्यकोपनिषद अस्यां विद्यायामस्ति प्रतिपादितं यत् भगवान् नारायण एव परमपुरुषोऽस्ति, [3] "पुरुषविद्यायामपिचेतरेषामिति" सूत्रे चकार महर्षिर्बादरायणः ।

**ईशावास्यविद्या** - इयं विद्या ईशावास्योपनिषदि वर्णिताऽस्ति, अत्र परस्य ब्रह्मणो जगद्व्यापकत्वमस्ति वर्णितम्, [4] "ईशावाश्यामिदं सर्वं यत् किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्" इत्यादिभिः श्रुतिभिः, महर्षिर्बादरायणो विद्यामिमां पुरुषार्थाधिकरणे विवेचितवान् ।

**उषस्तिकहोलविद्या** - बृहदारण्यकोपनिषदः विद्यायामस्यां प्रतिपादितमस्ति यत् भगवतः प्रसन्नतायै भोजनादिकस्य नियमपालनमप्यावश्यकं भवति । सर्वान्

---

१ शारीरकमीमांसा ३/१/१
२ शारीरकमीमांसा ३/३/२०
३ शारीरकमीमांसा ३/३/२३

४इशावास्योपनिषत् १

नानुमत्यधिकरणे महर्षिर्बादरायणः विद्यामिमां व्याचकार [१] "सर्वान्नानुमतिः प्राणात्यये तद्दर्शनात्" इत्यादिभिः।

**न्यासविद्या** - अस्यां विद्यायां ब्रह्मणो व्याहृति शरीरकत्वं मन्त्रमयत्वं चास्तिप्रतिपादितम् [२] "नानाशब्दादिभेदात्" इति सूत्रे महर्षिर्बादरायणो विद्यामिमां व्याचकार ।

इमा सर्वा उपनिषत्सुवर्णिता विद्या उपासनारूपाः सन्ति, अत एव भक्तेः कोटावेवाटीकन्ते

## उपनिषत्सु पुरुषार्थविवेचनम्

यद्यपि सन्ति प्रख्याताः धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः तथापि उपनिषदः धमार्थकामात्मकं त्रिवर्गमपहाय प्रधानतया परमपुरुषार्थस्याथवा मोक्षस्यैव वर्णनं कुर्वन्ति, अस्यां मोक्षावस्थायां जीवः "एष आत्मापहतपाप्मा विजरोऽविमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः" इति श्रुत्यनुसारेणाविर्भूतगुणाष्टको भवति । स यदा कामयते यत् मदीयाः पूर्वेषु कति मातर अभूवन कति चाभूवन् पितरः तदा तस्य सत्यसंकल्पस्य समकालमेव पूर्वजन्मनां सर्वान् जीवान् मुक्तान् करोति । "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति श्रुत्यनुसारेण मुक्तो जीवः परमात्मनः सत्यसंकल्पेनैव भोगान् लभते, परञ्चात्यन्तसाम्यापन्ना अपि मुक्ताः नित्या अपि जीवाः जगद्व्यापारं कर्तुं नहि प्रभवन्ति इति, एतत् कार्यं तु परमात्मन एव विद्यते इति प्रतिपादयामास भगवान्बादरायणः" " जगद्व्यापारवर्जत्वादिति" शारीरके सूत्रे।

अनेन विवेचनेनायमर्थः सम्पन्नो यत् सर्वा उपनिषदः जगति जनिमतां जननमरणपदवीजंधालानां जीवानामात्मोज्जीवनाय तत्वहितपुरुषार्थानां विशदं विवेचयन्तीति शम् ।

### ।। इति द्वितीयोऽध्यायः ।।

---

१ शारीरकमीमांसा ३/४/२८

२ शारीरकमीमांसा ३/३/६१